# READING - 10

नृपं द्रष्टुमागच्छत्वार्यपुत्र इत्याज्ञां श्रुत्वा श्रीरामः समुत्पन्नकौतूहलो वायुवेगेन राजभवनमागच्छत् । आगत्य च विवर्णमुखं राजानं दृष्ट्वा जातचिन्तो वचनमब्रवीत् । जयत्वार्यः । भवदाज्ञयागतो ऽस्मि । कुतो भवानश्रुपूर्णलोचनः। मयि जातक्रोध इव भवान् भाति । अप्यहं कृतापराध इति । पुत्रवचनं श्रुत्वा दशरथः कृतप्रयत्नो ऽपि किमपि भाषितुं नाशक्नोत् । तदा राजकुमारः कैकेयीमपृच्छत् । देवि किमिति नृपतिरद्य विषण्णमनाः । सर्वदा मां दृष्ट्वा मम पिता कुपितो ऽपि प्रसीदति । अद्य तु मां संप्रेक्ष्य राज्ञस्तस्य खेदः कुतः प्रवर्तत इति । एवमुक्ता तु महात्मना राघवेण सा पुनरतिदारुणं वचनमुक्तवती । हे राम श्रूयताम् । पुरा तव पित्रा मह्यं द्वौ वरौ दत्तौ । प्रथमेन भरताभिषेको वृतो मया द्वितीयेन च तव दण्डकारण्यगमनम् । यदि पितरं सत्यप्रतिज्ञं कर्तुमिच्छसि तर्हि मम वचनेन भवान्वनवासी भवतु भरतश्च राज्यं प्रशास्तु । रामस्तु तस्या वज्रोपमं वचः श्रुत्वा क्षणमपि नाव्यथत । शान्तमना एवमस्तु देव्यद्यैव वनं गच्छामीत्यभाषत ॥